Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences **ISSN: 2581-6241** **Volume - 3, Issue - 4, July-Aug – 2020**
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal **Impact Factor: 3.589**
Received on : 09/07/2020 **Accepted on : 23/07/2020** **Publication Date: 31/08/2020**

।।न्यायवैशेषिकदर्शनानुसारेण आत्मनः स्वरुपम् ।।

[1]LABANI BAIRAGYA **[2]PALASH DAS** **[3]NANDADULAL MANDAL**
[1, 2] Student, Pali, Prakrit & Sanskrit , Visva Bharati University, India.
[3]Assistant Professor, Education, Central Sanskrit University, Ekalavya campus , Agartala, , Tripura -799006, India
Email - [1] iamlabanibairagya2017@gmail.com [2] daspalash008@gmail.com
[3] nandadulalmandal3@gamil.com

सारांश (Abstract): भारतीयदर्शनेषु न्यायवैशेषिकसम्मतेषु नवद्रव्येषु आत्मा अष्टमद्रव्यम्। आत्मा सर्वेषु रोच्यते अपि च दार्शनिकेषु मुख्यालोच्यविषयः। कोऽपि दर्शनः नास्ति यत्र् आत्मा नालोचितम्। प्रत्येकदर्शने आत्मनः आलोचनत्वे सति सर्वेषाम् आत्मस्वरुपविषये अनैकमतमस्ति। न्यायवैषेशिकसम्मतः आत्मनः आलोचनायाम् अन्नंभट्टेनोच्यते – "ज्ञानाधिकरणमात्मा"। परमात्मा जीवात्मा च अनेन प्रकारेण आत्मा द्विधः। तन्मध्ये परमात्मा ईश्वरः सर्वज्ञः एकः एवः। जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

संकेताक्षरसूची (key words): जीवात्मा, परमात्मा, समवायीकारणम्, क्षित्याङ्कुरः, द्वणुकः, कार्यद्रव्यं, विभूः, साध्यम्।

१ भूमिका:

आत्मनः लक्षणम्-"ज्ञानाधिकरणम्"-इति मतानुसारेण आत्मानम् अर्थात् जीवात्मानम अथवा परमात्मनं ज्ञानस्वरुपं नोच्यते। उभयात्मा एव ज्ञानवान्। द्वर्योमध्ये भेदोऽस्ति परमात्मनः ज्ञानं नित्यम् एकं प्रत्यक्षं च। जीवस्य ज्ञानम् अनित्यम् अनेकम प्रत्यक्षश्च अनुमिति-उपमिति-शब्द-स्मृतिरुपं च। परन्तु उभयज्ञानस्य अधिकरणम्। ज्ञानाधिकरणत्वम् आत्माद्वयस्य लक्षणम्। तज्जन्य "ज्ञानसमवायिकारणत्वम्" नोच्यते। परमात्मनः ज्ञानं नित्यत्वे सति नित्यस्य समवायीकारणं वा कारणाभावत्वे सति परमात्मनि एवं प्रकारकं लक्षणस्य अव्याप्तिः भवितुं शक्यते। केवलं "ज्ञानाधिकरणम्" शब्देन उभयात्मानं वोधयितुं न शक्यते। "इच्छाधिकरणम्," "प्रयत्नाधिकरणम्" शब्देन अपि उभयात्मानं वोधयितुं शक्यते। ज्ञान- इच्छा-प्रयत्नः उभयात्मनः समानं गुणम्। जीवात्मनः वैशिष्टसूचकगुणः भवति – सुख-दुःख-द्वेष-धर्म-अधर्म-संस्कारश्च। कश्चन् परमात्मनि सुखस्य अस्तित्वं स्वीकरोति। परन्तु प्राचीनमूलग्रन्थेऽस्मिन् विषये स्पष्टोल्लेखं न भवति। सर्वसम्मतानुसारेण जीवात्मनि चतुर्दशपरमात्मनि च अष्टप्रकारकं गुणं दरीदृश्यते। संख्या-परिमान-पृथकत्व-संयोग-विभाग-ज्ञान-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्काराश्च एवं चतुर्दशप्रकारकं जीवात्मनि गुणम्, तन्मध्ये प्रथमोक्तपञ्चगुणानि सामान्यानि अवशिष्टानि च विशेषगुणानि। संख्या- परिणाम-पृथकत्व- संयोग-विभाग-ज्ञान-इच्छा-प्रयत्नाश्च एते अष्टप्रकारः परमात्मनः गुणं भवन्ति। केनापि उक्तं यत् परमात्मनः षड्प्रकारकं गुणं भवति। इच्छाप्रयत्नश्च परमात्मनि न भवति। तस्य ज्ञानम् इच्छा प्रयत्नश्च कार्यं करोति। परमात्मनः दुःख- द्वेष- धर्म- अधर्म- संस्कारश्च न भवति। अस्मिन् विषये सर्वैक्यमतं प्रोषयन्ति। अन्नंभट्टः परमात्मनः इच्छा प्रयत्नश्च स्वीकरोति। यद्यपि सः नित्यज्ञानाधिकरणत्वम् ईश्वरस्य लक्षणम् उवाच, तथापि इच्छा प्रयत्नश्च स्वीकरणार्थं नित्येच्छाधिकरणत्वं वा नित्यप्रयत्नाधिकरणत्वमपि ईश्वरस्य लक्षणं वक्तुं शक्यते।

२ ईश्वरस्य अस्तित्वे प्रमाणजिज्ञासा :

अत्र प्रश्नः जायते, ईश्वरः नित्यज्ञानाधिकरणम् उत् नित्येच्छाप्रयत्नाधिकरणं तत् पश्चात् विवेच्यम्। आदौ वक्तव्यम् यत् इश्वरः अस्ति अस्मिन् विषये किं प्रमाणम्? यद्यपि "लक्षणप्रमाणाभ्यां वस्तुसिद्धिः" अर्थात् लक्षणेन प्रमाणेन उभयप्रकारेण वस्तुनः

सिद्धिः जायते, तथापि प्रमाणमेव आदौ द्रष्टव्यम्। अतः आदौ वक्तव्यं यत् ईश्वरसद्भावे किं प्रमाणम्? विचारपूर्वकं दृश्यते यत् केनचित् प्रमाणेन ईश्वरस्य अस्तित्वं सिद्धं न भवति। प्रत्यक्षानुमानादिना केनापि प्रमाणेन यदि ईश्वरस्यास्तित्वं न भवति तर्हि अप्रामानिकम् ईश्वरस्य लक्षणम् असम्भवम्। तस्य ज्ञान-इच्छा- प्रयत्न-नित्यः सः एकः विभूश्च इत्यादिभिः गुणैः अलंकृयते तर्हि सः निर्थकं भवति न वा? इदं स्पष्टं यत् ईश्वरः अस्माकं प्रत्यक्षगोचरं न भवति। प्रत्यक्षप्रमाणेन ईश्वरं ज्ञातुं न शक्यते। इन्द्रियेन प्रत्यक्षप्रमाणं भवति। येन कस्यापि वस्तुनः यथार्थप्रत्यक्षानुभवं भवति तत् प्रत्यक्षप्रमाणम्। बहिरिन्द्रियरान्तरिन्द्रियभेदानुसारेण इन्द्रियद्विविधम्। बहिरिन्द्रियं भवति- चक्षु कर्ण नासिका जिह्बा तक् च तथा च अन्तरिन्द्रियं भवति मनः। ईश्वरः यदि प्रत्यक्षप्रमाणसिद्धं भवति तर्हि तत् प्रत्यक्षप्रमाणं किं रुपम्? तत् प्रत्यक्षं किं बाह्यप्रत्यक्षम् यस्य बहिरिन्द्रियेण तथा च आभ्यन्तरप्रत्यक्षं यत् मनसा जायते? यतः ईश्वरः ज्ञानाधिकरणं तद् अवश्यं स्वीकर्तव्यम् यतोहि ईश्वरः एकः द्रव्यः। वस्तुतोहि आत्मा जीवात्मा परमात्मा एतादृशं भवति। अतः ईश्वरः द्रव्यः अस्मिन् विषये सन्देहः नास्ति। ईश्वरः यदि द्रव्यं भवति तर्हि तस्याऽस्तित्वे बहिरिन्द्रेयेण प्रमाणं भवितुं न शक्यते। ईश्वरे संख्यादि सामान्यगुणाः पञ्चः, ज्ञानादि विशेषगुणाः त्रयः। रुपरसगन्धादि गुणाः ईश्वरे नास्ति। बहिरिन्द्रीयानां मध्ये चक्षुः त्वक् च इन्द्रियद्वयं द्रव्यग्रहणे सामर्थं भवति। यस्य द्रव्यस्योद्भूतरुपं नास्ति तस्य द्रव्यस्य ग्रहणे चक्षुः त्वक् च सर्वथा असमर्थः इति। ईश्वरः यदि उद्भूतरुपवान् भवितुं शक्यते तर्हि चक्षुः त्वक् च बहिरिन्द्रियद्वयं तस्य अस्तित्वप्रमाणयितुं शक्यते। किन्तु ईश्वरे उद्भूतरुपं नास्ति। अपि च किमपि रुपं नास्ति। सः सर्वोतोभावेन रुपहीनः। चक्षुः त्वक् इन्द्रियेन सह प्रत्यक्षगोचरं भवितुं न शक्यते। तर्हि किं ईश्वरः मनः नाम्नः अन्तरिन्द्रियेन सह गोचरीभूतं भवितुं शक्यते? प्रत्युत्वरे वक्तुं शक्यते न इति। अन्तरिन्द्रियः मनः साधारणतः सुख-दुःख-ज्ञान-इच्छा द्वेष-प्रयत्नाश्च एतेषां गुणानां प्रत्यक्षं करोति। यदि द्रव्यं प्रत्यक्षं करोति तर्हि तत् प्रत्यक्षगोचरगुणाश्रयभूतद्रव्यं प्रत्यक्षं करोति। यद् द्रव्यं सुखदुःखादि स्वकीयप्रत्यक्षगोचरगुणानामाश्रयं न भवति, तद्द्रव्यं कदापि अन्तरिन्द्रियः मनसः गोचरभूतं भवितुं न शक्यते। अतएव जीवात्मा तस्य सर्वेषु गुणेषु आश्रयरुपेण मानसप्रत्यक्षगोचरः भवितुं शक्यते। ईश्वरः हि सुखदुःखादि गुणात् जीवात्मनश्च सम्पूर्णं भिन्नम्। अतः ईश्वरः अन्तरिन्द्रियेन अगोचरं भवति। अर्थात् बाह्यः वा आन्तरः कोऽपि प्रत्यक्षम् ईश्वरसद्भावसाधकः भवितुं न शक्यते।

३ परमात्मनः ईश्वरस्य वा अस्तित्वसाधकप्रमाणम् :

अन्नंभट्टः दीपिकायाम् एका आशङ्का उत्थाप्योच्यते- "ननु ईश्वरस्य सद्भावे किं प्रमाणम् ?" प्रत्यक्षप्रमाणम् ईश्वरस्य अस्तित्वसाधकं भवितुं न शकय़ते। प्रत्यक्षः बाह्यः अथवा मानस भवति। बाह्यप्रत्यक्षः ईश्वरस्य अस्तित्वसाधकं भवितुं न शक्यते, यतः ईश्वररुपहीनद्रव्यम्। मानसप्रत्यक्ष अपि ईश्वरस्य अस्तित्वसाधकं भवितुं न शक्यते, यतः मानसप्रत्यक्षः जीवात्मनः सुखदुःखादिरुपः आन्तरवस्थायाः प्रकाशकः अपि च ईश्वरः आत्मनः सुखादितः भिन्नम्। अनुमानो अपि ईश्वरस्य अस्तित्वसाधकं भवितुं न शकय़ते , यतः अनुमानसाधकस्य यथार्थलिङ्गस्य अभावः अस्ति। आगमः शब्दप्रमाणमः वा ईश्वरस्य अस्तित्वसाधकं भवितुं न शकय़ते, यतः ततरुपम् आगमस्य अभावः अस्ति । अन्नंभट्टः दीपिकाटीकायाम् ईश्वरस्य अस्तित्वप्रमाणकरणार्थमनुमानप्रमाणमुपस्थापयति- "क्षित्याङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत् "। अर्थात् घटप्रभतिः कार्यं यथा कर्तृजन्यम्, क्षित्याङ्कुरः अर्थात् प्रथमोत्पन्नं कार्यम् अर्थात् द्वणुकादि कार्यमपि कर्तृजन्यम्- अनेन अनुमानेन ईश्वरस्य अस्तित्व सिद्धं भवति । उत्तपन्नजागतिकसर्वद्रव्यम- द्वणुकः, पर्वतसमुद्रादिः वस्तुनः अवशय़मेव किमपि कारणं कर्ता वा अस्ति , यतः तद्द्रव्यं घटपटादिवत् कार्यम। जगतः सर्ववस्तुः कार्यम्, यतः तानि सावयवानि, अर्थात् अवयवेन निर्मितः अवान्तरश्च महत्वयुक्तम्। द्वणुकात् आरभ्यः सागरपर्वतादिः सर्ववस्तुनि सावयवत्व अवान्तरश्च महत्वधर्म अवस्थितत्वे सति तानि घटादिवत् कार्यम्। यत्किञ्चित् सावयवम् तत् कोऽपि चेतनकर्तायाः कारणात् वा उत्तपन्नं भवति। कारणं कर्ता विना उपादानकारणात् कार्यमुत्पन्नं भवितुं न शक्यते । यथा कुम्भः कार्यवस्तुः। तस्य कर्ता कुम्भकारः कार्यद्रव्यः सकर्तृकः। जगत् कार्यद्रव्यं सुतरां जगत् सकर्तृकः –अनेन अनुमानेन जगतः कर्ता वा कारणरुपेन ईश्वरस्य अस्तित्वं सिद्धं भवति। घटादि कार्यम यथा – कर्तृजन्यं क्षित्याङ्कुरादि कार्यं तदर्थं कर्तृजन्यम्। तत् क्षित्याङ्कुरादिः कर्ता वा कारणं कोऽपि जीवः भवितुं न शक्यते। यतः यदि कोऽपि किञ्चित् कर्ता वा कारणं भवति तर्हि तस्य उपादानकारणम् अर्थात् समवायिकारणं परमाणुसमुहस्य साक्षात् वा अपरोक्षज्ञानम्, कार्योत्पादनेच्छा अपि च कार्योत्पादने कृति वा प्रयत्नस्य प्रयोजनमस्ति। किन्तु जीवस्य क्षित्यङ्कुरः वा द्वणुकस्य समवायिकारणं क्षितिः परमाणुसमुहस्य अपरोक्षज्ञानं भवितुं नार्हति, यतः जीवः अल्पज्ञः । सुतरां क्षित्यङ्कुरादेः कर्तारुपेन जीवात्मां भिन्नो एकसत्ता स्वीकर्तव्यम् । सः सर्वज्ञः , यतः केवलं सर्वज्ञः सत्ता एव सरलतमः सूक्षतमश्च परमाणुसमूहस्य साक्षात् ज्ञानं भवितुं

शक्यते। सुतरां द्वणुकादिः कर्तारुपेन चेतनः , सर्वशक्तिमानः, सर्वज्ञः ईश्वरस्य अस्तित्वम् अवश्यं स्वीकरणीयम्। ईश्वरस्य शरीरः नास्ति। शरीरेन विना ईश्वरस्य इच्छामात्रेण जीवस्य कर्मानुसारेण अस्य जगतः सृष्टिः भवति। " क्षत्याङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्।" -ईश्वरसाधकस्य अस्य अनुमानस्य पक्षः क्षित्यङ्कुरादिः साध्यः कर्तृजन्यत्वम्, हेतुः कार्यत्वम् दृटान्तः घटः। नैयायिकानां मतानुसारेण कार्यत्वहेतु निर्दोषः। अतः अनुमानं यथार्थम्। कार्यत्वहेतु विरुद्धः हेतुः वक्तुं न शक्यते। यतः साध्याभावस्य स्थले अर्थात् यत्र अकर्तृत्वम् अस्ति, तत्र कार्यत्वं नास्ति। सकर्तृत्वयुक्तसाध्यभिन्नान्यत्रः कार्यत्वं नास्ति। अपि च कार्यत्वहेतोः प्रतिपक्षः कोऽपि हेतुः नास्ति, यतः द्वणुकादेः साध्याभावास्य अर्थात् अकर्तृकत्वस्य साधकः भवितुं शक्यते। सुतरां कार्यत्वहेतुं सत्प्रतिपक्षहेतुः वक्तुं न शक्यते। द्वणुकादिः शरीरेन सृष्टं न भवति तर्हि तेषां कोऽपि कर्ता नास्ति। सुतरां कार्यत्वहेतुः सत्प्रतिपक्षः। विश्वनाथः 'न्यायसिद्धान्तमुक्तावल्याम्' तस्योत्तरे उक्तं यत् पूर्वपक्षिनः शरीरजन्यत्वम् अर्थात् शरीरेनोत्पन्नाभावात् हेतुः अत्यन्तं दुर्वलत्वात् कार्यत्वहेतोः प्रतिपक्षः भवितुं न शक्यते। द्वणुकादिः शरीरेन सृष्टं न भवति, किन्तु सकर्तृक- एवंरुपं व्याभिचारशङ्का निवारणाय कोऽपि अनुकूलतर्कः प्रतिवादीनः नास्ति। द्वणुकादिकार्यम्, किन्तु अकर्तृकं- एवंरुपं व्यभिचाराशङ्काक्षेत्रे- 'यदि कार्यम् अकर्तृकं भवति, तर्हि कर्तृजन्यं न भवेत्' – अनेम अनुकूलतर्केन सिद्धं भवति यत्, द्वणुकादि कार्यं सकर्तृकम्। सुतरां द्वणुकादिः कारणरुपेन ईशवरस्य अस्तित्वम् अवश्यं स्वीकरनीयम्। अन्नंभट्टः धीपिकायामुक्तं यत् आगमेन वेदवाक्येन वा ईश्वरस्य अस्तित्वं सिद्धं भवति। अस्मिन् प्रसङ्गे सः "यः सर्वज्ञः स सर्ववित्"- मुण्डकोपनिषद- (1\1\90) अनेन वेदवाक्येन उल्लेखं करोति। अस्मिन् वाक्ये यः 'सर्वज्ञः' 'सर्वविद्' च उच्चते सः ईश्वरः। अत्र उल्लेखयोग्यं यत् अन्नंभट्टः ईश्वरसाधकानुमानस्य उल्लेखानन्तरम् आगमस्य वा वेदवाक्यस्य उपस्थापनं करोति। अनेन सह ईश्वरसाधकानुमानं सुदृढं कर्तुं इच्छन्ति। अयं पद्धतिः नैयायिकानां युक्तिवादी दृष्टिभङ्गिः वा वेदवाक्यस्य अभ्रान्तता विषये वैशेषिकवत् दृष्टिकोणं सामञ्जस्यं वर्तते।

४ जीवात्मा :

अन्नंभट्टः दीपिकायां भणितं "सुखादौ आश्रयत्वं जीवलक्षणम्" अर्थात् सुख-दुःख-द्वेषादेः आश्रयः भवति जीवः। सुख-दुःख-ज्ञानम्- इच्छा-द्वेष-प्रयत्नादि भवति जीवस्य विशेषगुणः। सुखादिजीवस्य विशेषगुणम् इति उक्त्वा एवं न स्पष्टं भवति यत् जीवात्मनि सुखादि सर्वदा विराजते। परन्तु एवं कथयति यत् सुख-दुःख-द्वेषादि जीवात्मा भिन्नं इतरत्र न विराजते। परमात्मनि वा ईश्वरे सुख-दुःख-द्वेषः कदापि न विराजते। अन्नंभट्टः दीपिकायाम् उच्यते यत् आत्मा देहेन्द्रादिभ्यः स्वतन्त्रसत्वाः। नास्तिकशिरोमनि चार्वाकाचार्यस्य मते-"शरीरेवात्मा" । आत्मा शरीरश्च अभिन्नम्। चार्वाकाः उच्यन्ते ' अहं मनुष्यः,' 'अहं ब्रह्म,' अनेन प्रकारेण अस्माकं प्रत्यक्षोपलब्धिं भवति। अहं वा आत्मा शरीरात् भिन्नत्वे सति अस्याः उक्तेः कोऽपि अर्थं न भवति। तेषां मतेन एवं प्रकारकम् उपलब्धितः अहं वा आत्मारुपेण शरीरेव वोधयति। तस्मात् चार्वाकाः सिद्धान्तं कुर्वन्ति शरीरेव आत्मा। शरीरातिरिक्तः आत्मन अस्तित्वे कोऽपि प्रमाणं नास्ति। अन्नंभट्टः दीपिकायां चार्वाकमतखण्डनं कृत्वा उच्यते- शरीरः कदापि आत्मा भवितुं न शक्यते। आत्मा शरीरात् भिन्ना स्वतन्त्रसत्वा। यदि शरीरम् आत्मा भवति अर्थात् शरीरम् आत्मा च अभिनन्नत्वे सति शरीरस्य कस्याऽपि अङ्गस्य विनाशे शरीरस्य नाशत्वे सति आत्मनः अपि नाशं भवति इति वक्तुं शक्यते। किन्तु इदं मतं यदि स्वीकरोति तर्हि स्मृतेः व्यख्या कदापि कर्तुं न शक्यते। शरीरस्य कस्याऽपि अङ्गस्य विनाशे आत्मनः विनाशं यदि स्वीकरोति तर्हि शरीरस्य तदङ्गस्य विनाशस्य पूर्वे अनुभूतविषयस्य स्मरणम् असम्भवम्। स्मृतेः व्यख्यानाय शरीरातिरिक्तम् एकम् अभिन्नसत्वा अवश्यं स्वीकरणीयम्। क्षणे क्षणे परिवर्तनशीलशरीरं कदापि आत्मा भवितुं न शक्यते। अपि च अन्नंभट्टः दीपिकायामुच्यते यत् इन्द्रियकदापि आत्मा भवितुं न शक्यते। आत्मा इन्द्रियात् भिन्नं स्वतन्त्रसत्वा। इन्द्रियमात्मा च अभिन्नत्वे सति प्रत्यभिज्ञायाः व्यख्या कर्तुं न शक्यते। यः अहं घटं पश्यामि स आहं घटं स्पर्शं करोमि- एवं रुपं प्रत्यभिज्ञा अस्माकं भवति। अनेन प्रत्यभिज्ञास्थले प्रत्यक्षकर्ता स्पर्शकर्ता च अभिन्नरुपेण प्रतीतं भवति। किन्तु उदाहृतस्पर्शस्थले यत् इन्द्रियं कार्यं करोति प्रत्यक्षस्थले तदीन्द्रियं कार्यं न करोति। यदि इन्द्रियम् आत्मा च अभिन्नं भवति तर्हि अनुभवं जायते एकस्य स्मरणम् अपरस्य भवति। किन्तु यदि अनुभवकर्ता स्मरणकर्ता च अभिन्नं न भवति तर्हि स्मरणम् असम्भवम्। अभिन्नात्मा यदि स्वीकरोति तर्हि अनुभवं भवति एकस्य स्मरणम् अपरस्य भवति। सुतरां शरीरेन्द्रियात् भिन्नं एकः नित्यात्मनः अस्तित्वम् अवश्यं स्वीकर्तव्यम्। जीवात्मा प्रतिशरीरे भिन्नम्। जीवस्य सुखदुःखादेः भिन्नार्थं जीवं प्रतिशरीरे भिन्नमिति स्वीक्रियते।

५ उपसंहारः

जीवात्मा नित्यः विभुश्च। जीवः अनुपरिमाणविशिष्टः भवितुं न शक्यते। जीवः अनुपरिमाणविशिष्टत्वे सति शरीरस्य सर्वांशव्यापिसुखादेः यदनुभूतिं भवति तस्योपलब्धिं भवितुं न शक्यते। सर्वशरीरव्यापि सुखादेः उपलब्धेः व्यख्या भवितुं शक्यते केवलं यदि आत्माविभुः अर्थात् परममहत् परिमाणविशिष्टं भवति। अपि च जीवः मध्यमपरिमाणविशिष्टं भवितुं न शक्यते, यतः मध्यमपरिमाणविशिष्टं द्रव्यं स्वावयत्वात् क्षनान्तरं तस्य विनाशं भवति। किन्तु आत्मनः कदापि यदि विनाशं भवति तर्हि आत्मानम् अनित्यं वक्तुं शक्यते। फलतः कृतप्रणाशः अकृताभ्यागमः दोषं भवति। आत्मा यदि अनित्यं भवति तर्हि यः कर्मसम्पादं करोति, सः कर्मफलभोगं कर्तुं न शक्यते। फलतः कृतप्रणाशः दोषः जायते। अपि च यः कर्म न करोति स फलभोगं करिष्यति। फलतः अकृताभ्यागमदोषं भवति। अतः जीवात्मा नित्यविभुश्च।

सन्दर्भग्रन्थसूची (REFERENCES):

1.गोस्वामी, नारायणचन्द्रः, “तर्कसंग्रहः” कलिकाता, संस्कृतपुस्तकभण्डार, बङ्गाब्दः- 1423,

2. वागची, दीपककुमार, “तर्कसंग्रह ओ तर्कसंग्रहदीपिका” कलिकाता, मित्रम्, सन्-2012.

3.रायचौधुरि, अनामिका. “भाषापरिच्छेदः” कलिकाता, संस्कृतपुस्तकभण्डार, सन्-2015.

4. गोयेन्दका,हरिकृष्णदास. “ उपनिषत्” गोरक्षपुर, गीताप्रेस्, सन्- 2016.